# CBSE Class 12 Sanskrit Core 2026 - Set-4 (22)

## Question Paper

Conducted by the Central Board of Secondary Education (CBSE)

**Time Allowed: 3 Hours** **Maximum Marks: 80**

### General Instructions

(i) इस प्रश्नपत्र में कुल **18** प्रश्न और चार खण्ड हैं।

(ii) खण्ड क: प्रश्न 1। खण्ड ख: प्रश्न 2–4। खण्ड ग: प्रश्न 5–9। खण्ड घ: प्रश्न 10–18।

(iii) प्रत्येक प्रश्न में दिए गए विशिष्ट निर्देशों और आंतरिक विकल्पों के अनुसार उत्तर दीजिए।

(iv) उत्तर लिखने से पहले प्रश्न की संख्या अवश्य लिखिए।

## Section A

**1.**

अद्यत्वे अस्माकं शान्तिप्रिये भारतवर्षे गंभीरा आतंकवाद-समस्या वर्तते । प्रतिदिनम् आतंकवादिन: अनेकान् निरीहान् जनान् व्यापादयन्ति । जम्मूकाश्मीरे नियुक्ता: भारतीयसैनिका: स्वदेशस्य रक्षायै प्राणान् अपि समर्पयन्ति । काश्मीरे नियुक्त – सैनिकानां भार्या: आशङ्किता: भवन्ति, यत् न जाने कदा तासां पति: संघर्षे वीरगतिं प्राप्नुयात् । अस्माकं प्रतिवेशिना पाकिस्तानदेशेन आतंकवादिभ्य: अस्त्रशस्त्राणि धनादीनि च प्रदीयन्ते । केचन अपरिपक्वबुद्धय: युवका: प्रतिवेशिदेशस्य मिथ्याप्रचारै: भ्रान्ता: सन्त: हिंसामार्गम् अनुगच्छन्ति । "हिंसामाध्यमेन न कस्या: अपि समस्याया: समाधानं प्राप्तुं शक्यते" इति प्रधानमन्त्रिणा मुहु: मुहु: कथ्यते । वस्तुत: सम्पूर्ण: विश्व: एव आतंकवादस्य समस्यया ग्रस्त: वर्तते न केवलं भारतवर्ष: एव, अत: विश्वस्य प्रमुखै: राष्ट्राध्यक्षै: एतस्य आतंकवादस्य समूलनाशाय कश्चन उपाय: यथाशीघ्रं चिन्तनीय: ।

---

**1(अ).** एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in one word : (Only two questions)

(i) अद्यत्वे भारतवर्षे का समस्या वर्तते ?

(ii) के अनेकान् निरीहान् जनान् व्यापादयन्ति ?

(iii) भारतीयसैनिका: कस्य रक्षायै प्राणान् समर्पयन्ति ?

---

**1(आ).** पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in a complete sentence : (Only two questions)

(i) सैनिकानां भार्या: किमर्थं आशङ्किता: भवन्ति ?

(ii) कीदृशा: युवका: हिंसामार्गम् अनुगच्छन्ति ?

(iii) प्रधानमन्त्रिणा मुहु: मुहु: किं कथ्यते ?

---

**1(इ).**

अस्य अनुच्छेदस्य द्वित्रिशब्दात्मकं समुचितं शीर्षकं लिखत ।

---

**1(ई)(i).**

'आतंकवादिन:' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम् ?

(A) वर्तते (B) व्यापादयन्ति
(C) समर्पयन्ति (D) प्रदीयन्ते

---

**1(ई)(ii).**

'भारतवर्षे' इति पदस्य विशेषणपदं चिनुत ।

(A) शान्तिप्रिये (B) संघर्षे
(C) अद्यत्वे (D) जम्मूकाश्मीरे

---

**1(ई)(iii).**

'प्रदीयन्ते' इति क्रियापदस्य कर्तृपदं चिनुत ।

(A) भारतीयसैनिका: (B) मिथ्याप्रचारै:
(C) पाकिस्तानदेशेन (D) भार्या

---

**1(ई)(iv).**

'वारं-वारम्' इति पदस्य पर्यायपदं गद्यांशात् चिनुत ।

(A) समाधानम् (B) अस्माकम्
(C) प्रतिदिनम् (D) मुहु: मुहु:

## Section B

**2.**

भवती स्वप्ना । भवत्या: विद्यालये आयोक्ष्यमाणे वार्षिकोत्सवे संस्कृतनाटकस्य मञ्चनं भविष्यति । अस्मिन्नवसरे स्वसख्यै श्रुतिकृते प्रेषिते निमन्त्रणपत्रे मञ्जूषात: पदानि चित्वा रिक्तस्थानानि पूरयित्वा पुन: लिखत ।

पत्रम्

प्रियसखि (i)___ ! सप्रेम नमो नम: । अत्र (ii)___ तत्रास्तु । अस्माकं (iii)___ वार्षिकोत्सव: वसन्तपञ्चमीपर्वण: अवसरे आयोक्ष्यते । अत्र महाकवि-कालिदासेन (iv)___ अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य (v)___ छात्रै: प्रस्तोष्यते । अयम् अङ्क: संस्कृतसाहित्यस्य रत्नभूत: अस्ति । अहमपि शकुन्तलाया: (vi)___ (निर्वक्ष्यामि) । अस्माभि: प्रतिदिनं नाटकस्य (vii)___ क्रियते । एतद् दृष्ट्वा त्वं नूनम् (viii)___ आनुभविष्यसि । अस्मिन् दिने त्वया अवश्यमेव अत्र (ix)___ । परिवारे सर्वेभ्य: मम प्रणामाञ्जलि: निवेदनीया ।

तव प्रियसखी

(x)___

मञ्जूषा: आनन्दम्, श्रुते!, कुशलम्, विद्यालयस्य, आगन्तव्यम्, भूमिकाम्, विरचितस्य, मञ्चनम्, स्वप्ना, पूर्वाभ्यास: ।

**3(क).**

प्रदत्तचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया अथवा स्वतन्त्ररूपेण संस्कृतेन पञ्चवाक्यानि लिखत ।



मञ्जूषा: वृक्षारोपणम्, छात्रा:, वातावरणम्, विद्यालये, भवति, स्वच्छम्, वायुं, मिलति, प्राणवायु:, करणीयम्, वृक्षान्, आरोपयन्ति ।

OR

**3(ख).**

मञ्जूषायां प्रदत्तशब्दानां सहायतया निम्नलिखितं विषयम् आदाय पञ्चभि: संस्कृतवाक्यै: एकम् अनुच्छेदं लिखत । विषय: - 'भारतदेश:'

मञ्जूषा: आर्यावर्त:, प्राचीनं, प्रसिद्ध:, नाम, देशस्य, सनातनी संस्कृति:, विभिन्नपर्वाणि, जना:, उल्लासपूर्वकं, भागं, प्रसिद्धा:, नद्य:, गृह्णन्ति, सन्ति, विश्वगुरु:, पुरा, पर्वता:, सागरा:, आसीत् ।

## 4(क).

मञ्जूषायां प्रदत्तशब्दानां सहायतया अधोलिखितायां-लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत । नागार्जुनः प्रसिद्धः रसायनशास्त्रज्ञः सुविख्यातः (i)___ अपि च आसीत् । देशविदेशेषु तस्य (ii)___ प्रसृता । एकदा तस्य समीपे (iii)___ युवकौ आगच्छताम् । तौ तस्य सहायकौ भवितुम् इच्छतः स्म । नागार्जुनः उभाभ्याम् अपि एकम् एकं वस्तु (iv)___ उक्तवान् - श्वः अनेन रसायनं निर्माय (v)___ । तेनैव भवतोः परीक्षा भविष्यति, एकस्य चयनमपि (vi)___ । अन्यस्मिन् दिने एकः रसायनं (vii)___ आनीतवान् । द्वितीयः अवदत् - कृपया क्षम्यताम् । मया मार्गे एकः वृद्धः रोगी (viii)___ । तं चिकित्सालयं नीत्वा सेवां कृतवान् । अतः (ix)___ समय एव न लब्धः । सः रुग्णः नागार्जुनेन एव मार्गे (x)___ स्थापितः आसीत् । अतः द्वितीयः एव युवकः परीक्षायां सफलः जातः ।

मञ्जूषाः रसायननिर्माणार्थं, वैद्यः, दत्वा, निर्माय, करिष्यामि, आनेतव्यम्, कीर्तिः, दृष्टः, परीक्षायै, द्वौ ।

OR

OR

## 4(ख).

अधोलिखित-संवादे मञ्जूषातः संवादवाक्यं चित्वा रिक्तस्थानानि पूरयत । आचार्या - भो उमे ! जानासि यद् अस्माकं देशस्य प्राचीनं नाम किम् आसीत् ? उमा - महोदये ! (i)___ । आचार्या - शोभनम् । आर्यावर्तस्य अर्थोऽस्ति - आर्याणां स्थानम् । अत्र आर्यशब्दस्य अर्थः कः अस्ति ? उमा - (ii)___ । आचार्या - शोभनम् उमे ! अत्र सर्वे एव श्रेष्ठाः जनाः अवसन् । अधुना वद - अस्माकं देशस्य नाम भारतम् कस्य नाम्ना जातम् ? उमा - (iii)___ । आचार्या - शोभनम् - ऋषभदेवस्य पुत्रः चक्रवर्ती राजा भरतः आसीत् । एकोऽपरः भरतः कस्य पुत्रः आसीत् ? उमा - महोदये ! (iv)___ । आचार्या - बहुशोभनम्, राज्ञः दशरथस्य चत्वारः पुत्राः आसन् - रामः, लक्ष्मणः, भरतः, शत्रुघ्नश्च । रामेण सह वनम् एतेषु कः गतवान् ? उमा - महोदये ! (v)___ ।

मञ्जूषाः राज्ञः भरतस्य नाम्ना भारतं नाम जातम् ।, रामेण सह लक्ष्मणः वनं गतवान् ।, आर्यशब्दस्य अर्थः श्रेष्ठः भवति ।, अस्माकं देशस्य प्राचीनं नाम आर्यावर्तः आसीत् ।, अपरः भरतः महाराज-दशरथस्य पुत्रः आसीत् ।

## Section C

### 5(i).

अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत । (केवलम् प्रश्नचतुष्टयम्)
वेदमनूच्य आचार्योऽन्तेवासिनम् अनुशास्ति ।

### 5(ii).

अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत । (केवलम् प्रश्नचतुष्टयम्)
वनगमननिवृत्तिः पार्थिवस्य + एव तावत् ।

### 5(iii).

अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत । (केवलम् प्रश्नचतुष्टयम्)
वैवस्वतो मनुः + नाम माननीयो मनीषिणाम् ।

### 5(iv).

अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत । (केवलम् प्रश्नचतुष्टयम्)
न वयं शिवगणास्तादृशाः ।

### 5(v).

अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत । (केवलम् प्रश्नचतुष्टयम्)
तदाहं तु जीवन्नपि मृतः भविष्यामि ।

### 5(vi).

अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत । (केवलम् प्रश्नचतुष्टयम्)
इति + उक्त्वा ऋतध्वजः तूष्णीम् अतिष्ठत् ।

### 6(i).

अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)
यानि अनवद्यानि कर्माणि तानि सेवितव्यानि ।

(A) न अवद्यानि (B) न वद्यानि
(C) न अनवद्यानि (D) अन् वद्यानि

### 6(ii).

अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)
धैर्यसागरः लक्ष्मणः केन क्षोभितः ?

(A) धैर्येण सागरः (B) धैर्याय सागरः
(C) धैर्यस्य सागरः (D) धैर्यात् सागरः

### 6(iii).

अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)
दुष्टः उरगेण क्षता अंगुलीव त्याज्यः ।

(A) उरगेनक्षता (B) उरगक्षता
(C) उरगाक्षता (D) उरगेक्षता

### 6(iv).

अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)
स एव यथोचितं व्यवहरिष्यति ।

(A) उचितम् यथा (B) यथा उचितम्
(C) उचितम् अनतिक्रम्य (D) उचितं क्रम्य

## 6(v).

अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)
परस्परमनुव्रतौ <u>पतिपत्न्यौ</u> त्रिवर्गं साधयतः ।

(A) पतिः च पत्नी च (B) पतिः पत्न्यौ च
(C) पती पत्न्यौ च (D) पती च पत्नी च

## 6(vi).

अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)
नष्टात्मानो<u>ऽल्पबुद्धयः</u> ।

(A) अल्पाः बुद्धयः (B) अल्पा च बुद्धिः
(C) अल्पा च बुद्धिः च (D) अल्पा बुद्धिः येषां ते

## 7(i).

अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयुक्तं विभक्तं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्यः चिनुत । (केवलं प्रश्नचतुष्टयम्)
शठः सहस्रैरपि <u>शिक्ष्यमाणः</u> ।

(A) शिक्ष् + शानच् (B) शिक्ष् + मतुप्
(C) शिक्ष् + शतृ (D) शिक्ष् + तव्यत्

## 7(ii).

अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयुक्तं विभक्तं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्यः चिनुत । (केवलं प्रश्नचतुष्टयम्)
वर्षाणि खलु <u>वस्तव्यं</u> चतुर्दश वने त्वया ।

(A) वस् + तव्यत् (B) वस् + अनीयर्
(C) वस्त + व्यम् (D) वस् + तव्यम्

## 7(iii).

अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयुक्तं विभक्तं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्यः चिनुत । (केवलं प्रश्नचतुष्टयम्)
तदन्वये शुद्धमति <u>प्रसूतः</u> ।

(A) प्र + सू + क्तवतु (B) प्र + सू + क्त
(C) प्र + सू + क्त्वा (D) प्रसू + क्तिन्

## 7(iv).

अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयुक्तं विभक्तं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्यः चिनुत । (केवलं प्रश्नचतुष्टयम्)
राजाज्ञा <u>पालनीया</u> एव ।

(A) पालन + इया (B) पालनी + या
(C) पालनी + टाप् (D) पालनीय + टाप्

## 7(v).

अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयुक्तं विभक्तं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्यः चिनुत । (केवलं प्रश्नचतुष्टयम्)
सिद्धोऽहं <u>बल + मतुप्</u> सुखी ।

(A) बलवान् (B) बलमान्
(C) बलवतुम् (D) बलमतुप्

## 7(vi).

अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयुक्तं विभक्तं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्यः चिनुत । (केवलं प्रश्नचतुष्टयम्)
सः यदा पञ्च-<u>वार्षिकः</u> जातः ।

(A) वर्ष + इन् (B) वर्ष + ठक्
(C) वर्षा + इनि (D) वार्ष + इक

## 8(i).

प्रदत्तविकल्पेभ्यः उचितम् उपपद-विभक्तिरूपं चिनुत । (केवलं प्रश्नचतुष्टयम्)
____ न प्रमदितव्यम् ।

(A) धर्मात् (B) धर्मेण
(C) धर्मम् (D) धर्मस्य

**8(ii).**

प्रदत्तविकल्पेभ्य: उचितम् उपपद-विभक्तिरूपं चिनुत । (केवलं प्रश्नचतुष्टयम्)
हा धिक् ! ___ अविज्ञायोपालभसे ।

(A) अस्माभि: (B) वयम्
(C) अस्मान् (D) अस्मभ्यम्

**8(iii).**

प्रदत्तविकल्पेभ्य: उचितम् उपपद-विभक्तिरूपं चिनुत । (केवलं प्रश्नचतुष्टयम्)
अहम् अधुनैव ___ पारदभस्म ददामि ।

(A) त्वाम् (B) युष्मान्
(C) तुभ्यम् (D) यूयम्

**8(iv).**

प्रदत्तविकल्पेभ्य: उचितम् उपपद-विभक्तिरूपं चिनुत । (केवलं प्रश्नचतुष्टयम्)
कश्चन कापालिक: ___ समागत: ।

(A) सभायै (B) सभायाम्
(C) सभाया: (D) सभाम्

**8(v).**

प्रदत्तविकल्पेभ्य: उचितम् उपपद-विभक्तिरूपं चिनुत । (केवलं प्रश्नचतुष्टयम्)
___ अन्ते च वारि अमृतं भवति ।

(A) भोजनस्य (B) भोजनेन
(C) भोजनात् (D) भोजने

**9(i).**

अधोलिखितवाक्येषु वाच्यानुसारं कोष्ठकप्रदत्तशब्दै: रिक्तस्थानानि पूरयत । (केवलं प्रश्नचतुष्टयम्)
ध्रुव: ___ पिबति ।

(A) दुग्धं (B) दुग्धेन

**9(ii).**

अधोलिखितवाक्येषु वाच्यानुसारं कोष्ठकप्रदत्तशब्दै: रिक्तस्थानानि पूरयत । (केवलं प्रश्नचतुष्टयम्)
अस्माभि: ग्राम: ___ ।

(A) गमिष्यते (B) गमिष्यति

**9(iii).**

अधोलिखितवाक्येषु वाच्यानुसारं कोष्ठकप्रदत्तशब्दै: रिक्तस्थानानि पूरयत । (केवलं प्रश्नचतुष्टयम्)
त्वं संस्कृतगीतं ___ ।

(A) गास्यसि (B) गास्यते

**9(iv).**

अधोलिखितवाक्येषु वाच्यानुसारं कोष्ठकप्रदत्तशब्दै: रिक्तस्थानानि पूरयत । (केवलं प्रश्नचतुष्टयम्)
___ तीव्रं धाव्यते ।

(A) सोहन: (B) सोहनेन

**9(v).**

अधोलिखितवाक्येषु वाच्यानुसारं कोष्ठकप्रदत्तशब्दै: रिक्तस्थानानि पूरयत । (केवलं प्रश्नचतुष्टयम्)
छात्राभि: क्रीडा ___ ।

(A) क्रीड्यते (B) क्रीडन्ति

## Section D

**10.**

वेदम् अनूच्य आचार्योऽन्तेवासिनम् अनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनम् आहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम् । देवपितृ-कार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव ।

**10(अ).** एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in one word : (Only two questions)

(i) आचार्यः कम् अनुशास्ति ?

(ii) कं चर ?

(iii) कस्मात् मा प्रमदः ?

**10(आ).** पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in a complete sentence : (Only two questions)

(i) कम् अनूच्य आचार्यः अन्तेवासिनम् अनुशास्ति ?

(ii) आचार्याय किम् आहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः ?

(iii) अतिथिः कः भवति ?

**10(इ).** यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्) / Answer as directed : (Only two questions)

(i) 'शिष्यम्' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(ii) 'आचार्यः' इति कर्तृपदस्य क्रियापदं किम् ?

(iii) 'धनम्' इति पदस्य विशेषणपदं किं प्रयुक्तम् ?

**11.**

अल्पज्ञ एव पुरुषः प्रलपत्यजस्रं, पाण्डित्यसम्भृतमतिस्तु मितप्रभाषी । कांस्यं यथा हि कुरुतेऽतितरां निनादं, तद्वत् सुवर्णमिह नैव करोति नादम् ।।

**11(अ).** एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in one word : (Only two questions)

(i) कीदृशः पुरुषः अजस्रं प्रलपति ?

(ii) पाण्डित्यसम्भृतमतिः कीदृशः भवति ?

(iii) सुवर्णं किं न करोति ?

**11(आ).** पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in a complete sentence : (Only two questions)

(i) अतितरां निनादं किं करोति ?

(ii) मितप्रभाषी कः भवति ?

(iii) अल्पज्ञः पुरुषः किं करोति ?

**11(इ).** यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्) / Answer as directed : (Only two questions)

(i) 'पुरुषः' इति पदस्य कृते विशेषणपदं किं प्रयुक्तम् ?

(ii) 'बहुभाषी' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

(iii) 'सुवर्णम्' इति कर्तृपदस्य क्रियापदं किम् अस्ति ?

**12.**

ऋतध्वज: - प्रथमं तु सखीवचनं श्रोष्याव: । तदनु स्वयमेव कुलगुरुं पितरौ च सभाजयितुं गमिष्याव: ।
कुण्डला - परस्परप्रीतिमतो: भवतो: उपदेशस्य नास्ति कोऽपि अवकाश:, तदापि सखीस्नेह: मां भाषयति - भर्त्रा सदैव भार्या भर्तव्या रक्षितव्या च । यतो हि धर्मार्थकामसंसिद्धये यथा भार्या भर्तु: सहायिनी भवति तथा न कोऽपि अन्य: । परस्परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयत: । पति: यदि प्रभूतं धनम् अर्जयित्वा गृहमानयति, तत्खलु पत्न्यभावे कुपात्रेषु दीयमानं क्षयमेति ।
ऋतध्वज: - लक्ष्म्या: रक्षार्थं पत्न्या: सहयोग: अनिवार्य: ।
मदालसा - कुण्डले ! लक्ष्मीपूजायां न मे प्रवृत्ति: । यदि लक्ष्मी: पूज्या प्रिया च अतिथिवर्यस्य, तदा इदानीमेव मे नमस्कार: ।

**12(अ).** एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in one word : (Only two questions)

(i) प्रथमं तु किं श्रोष्याव: ?

(ii) पतिपत्न्यौ किम् साधयत: ?

(iii) भार्या कस्य सहायिनी भवति ?

**12(आ).** पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) / Answer in a complete sentence : (Only two questions)

(i) तदनु स्वयमेव किमर्थं गमिष्याव: ?

(ii) तदापि सखीस्नेह: मां किं भाषयति ?

(iii) पत्न्या: सहयोग: किमर्थम् अनिवार्य: ?

**12(इ).** यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्) / Answer as directed : (Only two questions)

(i) 'सुपात्रेषु' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

(ii) 'पतिपत्न्यौ' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम् ?

(iii) 'परस्परप्रीतिमतो: भवतो:' इत्यनयो: पदयो: विशेषणपदं किम् ?

**13(क).**

अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तशब्दै: पूरयित्वा पुन: लिखत । एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना । आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी ।। भावार्थ: एकेन अपि (i)___ विद्या सहितेन (ii)___ च सम्पूर्ण: वंश: तथैव प्रसन्नो भवति, यथा (iii)___ रात्रि: प्रसन्ना भवति ।
मञ्जूषा: चन्द्रेण, सुपुत्रेण, सज्जनेन ।
OR

OR

**13(ख)(अ).**

प्रदत्तभावत्रयात् शुद्धं भावार्थं चित्वा लिखत । भोजने चामृतं वारि भोजनान्ते विषप्रदम् ।

(A) भोजनस्य मध्ये जलं अमृततुल्यं तथा भोजनस्य अन्ते विषतुल्यं भवति ।

(B) भोजनस्य मध्ये जलं विषतुल्यं तथा अन्ते अमृतम् इव भवति ।

(C) भोजनस्य मध्ये अन्ते च जलं विषयुक्तं भवति ।

OR

## 13(ख)(आ).

प्रदत्तभावत्रयात् शुद्धं भावार्थं चित्वा लिखत । मया दृढं परीक्षितोऽसि ।

(A) मया त्वं परीक्ष्यसे ।

(B) अहं तव कठिनपरीक्षां कृतवान् ।

(C) मया पूर्वं त्वं दृष्टः असि ।

OR

## 13(ख)(इ).

प्रदत्तभावत्रयात् शुद्धं भावार्थं चित्वा लिखत । युधिष्ठिरस्य एषा एव चिन्तनसरणिः ।

(A) तस्य ईदृशी प्रवृत्तिः नासीत् ।

(B) ज्येष्ठ-पाण्डुपुत्रस्य ईदृशी एव विचारधारा ।

(C) युधिष्ठिरस्य कुलपरंपरा ईदृशी एव ।

## 14.

अधोलिखितश्लोकस्य प्रदत्ते अन्वये रिक्तस्थानानि मञ्जूषाप्रदत्तशब्दानां सहायतया पूरयत । अक्षोभ्यः क्षोभितः केन लक्ष्मणो धैर्यसागरः । येन रुष्टेन पश्यामि, शताकीर्णमिवाग्रतः ।।
अन्वयः केन (i)___ अक्षोभ्यः लक्ष्मणः (ii)___ येन रुष्टेन (iii)___ इव अग्रतः पश्यामि ।
मञ्जूषाः शताकीर्णम्, क्षोभितः, धैर्यसागरः ।

## 15(क).

क स्तम्भस्य वाक्यानां ख स्तम्भस्य उपयुक्तवाक्यैः सह मेलनं कुरुत । क स्तम्भः (i) त्रिविधं नरकस्येदं (ii) भरतो वा भवेद् राजा (iii) स पिता पितरस्तासां (iv) पिको वसन्तस्य गुणं न वायसः
ख स्तम्भः (1) वयं वा ननु तत् समम् (2) केवलं जन्महेतवः (3) करी च सिंहस्य बलं न मूषकः (4) द्वारं नाशनमात्मनः ।
OR

OR

## 15(ख).

अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् अर्थं मञ्जूषातः चित्वा लिखत ।
(i) असौ मया <u>हतः</u> शत्रुः ।
(ii) विद्या ददाति विनयम् अत एव एवं <u>भणसि</u> ।
(iii) नैकेनापि समं गता <u>वसुमती</u> ।
(iv) त्यागाय संभृतार्थानां सत्याय <u>मितभाषिणाम्</u> ।
मञ्जूषाः पृथ्वी, मारितः, अल्पभाषिणाम्, वदसि ।

## 16(i).

अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्)
'अनुशासनम्' इति पाठः कस्मात् उपनिषदः संगृहीतः ?

### 16(ii).

अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्)
'प्रतिमानाटकम्' इति ग्रन्थस्य रचयिता क: ?

### 16(iii).

अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्)
'दौवारिकस्य निष्ठा' इति पाठस्य रचयिता क: ?

### 16(iv).

अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्)
'भोजप्रबन्ध:' इति पुस्तकात् क: पाठ: संगृहीत: ?

### 17(i).

मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत ।
मञ्जूषा: पद्यकाव्यम्, कादम्बरी, पदलालित्यम्, गद्यपद्यमयम् ।
दण्डिन: ___ प्रसिद्धमस्ति ।

### 17(ii).

मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत ।
मञ्जूषा: पद्यकाव्यम्, कादम्बरी, पदलालित्यम्, गद्यपद्यमयम् ।
छन्दोयुक्ता रचना ___ कथ्यते ।

### 17(iii).

मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत ।
मञ्जूषा: पद्यकाव्यम्, कादम्बरी, पदलालित्यम्, गद्यपद्यमयम् ।
प्रसिद्ध: उपन्यासकार: बाणभट्ट: ___ ग्रन्थस्य रचयिता अस्ति ।

### 17(iv).

मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत ।
मञ्जूषा: पद्यकाव्यम्, कादम्बरी, पदलालित्यम्, गद्यपद्यमयम् ।
___ काव्यं चम्पू: कथ्यते ।

### 18.

समुचितं मेलयत । क स्तम्भ: (i) नाटकस्य प्रारम्भे (ii) हास्योत्पादक: (iii) काव्येषु (iv) रूपकस्य भेदा:
ख स्तम्भ: (1) विदूषक: (2) दश (3) नान्दी (4) नाटकं रम्यम् ।

**- End of Question Paper -**